# विषयसूची।

## अ


| विषयाः | पृष्ठे | पङ्क्तौ |
|---|---|---|
| अंशानर्हाः | ६८१ | ७ |
| अकुलकरणानि | १२४ | २ |
| अङ्गीकरणविधिः | ५८६ | १३ |
| अघमर्षणव्रतम् | ७४६ | ८ |
| अतिकृच्छ्रः | ७१५ | ८ |
| अतिथिपूजा | ३२५ | ६ |
| अतिसान्तपनम् | ७३२ | १४ |
| अधिकारिणः | ४७८ | १२ |
| अधिमासे विहितानि निषिद्धानि | ५४४ | १८ |
| अधिवेदनम् | १८८ | १ |
| अध्ययनविध्यादयः | ९९ | ७ |
| अनध्यायाः | १०४ | १ |
| अनपत्यस्त्रीधनाधिकारिणः | ६६५ | १४ |
| अनवलोकनीयानि | १२२ | ४ |
| अनाक्रमणीयानधिष्ठेयानि | १२० | ९ |

## उ


| विषयाः | पृष्ठे | पङ्क्तौ |
|---|---|---|
| उच्चारविधिः | ४० | १८ |
| उत्सर्ज्जनम् | ८५ | ३ |
| उदकतर्पणम् | ७१४ | ४ |
| उपनयनकालादयः | १७ | १ |
| उपपातकप्रायश्चित्तानि | ८५३ | ११ |
| उपपातकादिप्रायश्चित्तम् | ८८१ | ८ |
| उपाकर्म्म | ८३ | ५ |
| उपाध्यायाद्युपरमे | ४३१ | ५ |
| उपासनस्य चोपासनम् | १७५ | ४ |


## ए


| | | |
|---|---|---|
| एकोद्दिष्टश्राद्धम् | ६१० | १२ |


## क


| | | |
|---|---|---|
| कर्णवेधः | ३५८ | १ |
| कर्त्तव्यधर्म्माः | १८२ | ८ |
| कर्म्मप्रशंसा | १३ | ७ |

**विष्णुः (क्रमागतः)—**

१९८।३, २०४।३, २०५।३, २०६।३, २०६।१९, २०७।७, २०९।१८, २२५।१४, २६३।८, २६५।१४, ३२६।१, ३२७।२०, ३२९।२२, ३३०।१४, ३३१।१, ३४०।९, ३४५।१, ३५२।६, ३५२।१३, ३८९।१४, ४१६।१४, ४२६।१, ४३३।७, ४३४।१, ४३५।१७, ४५५।१८, ४५७।११, ४६६।१०, ५२१।१३, ५३४।१५, ५५२।७, ५८७।१६, ६००।१६, ६२०।५, ६३१।७, ६७२।१५, ७३३।१२, ७३६।७, ७३७।९, ७४७।१, ७७६।१४, ७८१।११, ७९५।१६, ८०७।२१, ८१०।६, ८२२।५, ८४५।१७, ८४९।११, ८७६।१५, ८८६।१०, ९२७।१५

**वृद्धविष्णुः—**४३२।१६, ४३३।९

**बृहद्विष्णुः—**४३।७, ८१४।८, ८४९।१६, ८६८।१७, ९२४।१५, ९३२।१६, ९८७।८

**हारीतः—**३५।११, ३७।६, ४२।२२, ४७।४, ५६।५, ५६।१२, ५७।४, ७०।४, ९५।१८, ११०।८, ११३।१६, ११९।१६, १२१।१५, १२७।१६, १५७।६, १५७।११, १७२।११, १९६।१७, १९८।९, २१९।१३, २२८।१५, २४०।१०, २४१।१५, २८५।१७, २८८।१०, २९८।६, ३२८।१५, ३२९।१५, ३४१।८, ३४२।४, ३४८।१७, ३५२।३, ३९५।१८, ४२५।६, ४४७।१३, ४५१।१३, ४६५।१४, ४६६।४, ४६७।१४, ४८२।६, ४९७।२२, ५००।७, ५७८।१९, ६०७।१९, ६२८।१७, ६९।१५, ७०३।१८, ७०६।८, ७१८।१२, ७४२।११, ७४९।१९,

**याज्ञवल्क्यः (क्रमागतः)**

५६२।५, ५६७।१३, ५७२।३, ५७५।१, ५७६।१९, ५७७।५, ५७९।१२, ५९६।१०, ५९७।१, ५९७।७, ५९८।४, ५९९।६, ६१०।१३, ६१२।३, ६२१।१४, ६४५।१३, ६४६।१४, ६४७।२२, ६५०।१०, ६५५।१, ६५६।३, ६५७।९, ६५९।३, ६५९।१६, ६६२।८, ६६५।१, ६६५।१५, ६६८।१७, ६७०।९, ६७१।१७, ६७६।१, ६७६।१५, ६८१।८, ६८३।१७, ६८८।७, ६८८।१२, ६९५।८, ६९९।१०, ७०३।९, ७०३।१३, ७०४।१८, ७०८।१, ७१०।२, ७१५।१४, ७१६।१७, ७१७।७, ७१७।१४, ७१८।२, ७२७।१९, ७३१।१५, ७३३।२, ७३५।६, ७३८।१२, ७४३।२, ७४७।६, ७४७।११, ७७२।२०, ७८६।१९, ७९८।९, ७९८।१६, ८०२।१, ८०४।१७, ८०६।११, ८०८।११, ८११।१३, ८१५।८, ८१६।३, ८१८।१८, ८२३।२, ८२५।१३, ८२६।४, ८२८।१, ८३०।१४, ८३४।१८, ८३८।७, ८४५।३, ८४६।१६, ८५०।१३, ८५३।१८, ८५६।१८, ८७०।१९, ८९८।४, ९०८।१४, ९१५।३, ९१५।२०, ९२५।१६, ९५०।११, ९५०।२२, ९५१।८, ९५३।३, ९६१।१७, ९६२।८, ९६३।१२, ९६३ १९, ९६४।४, ९६६।६, ९६७।१०, ९६८।६, ९७०।७, ९७३।५, ९७६।३, ९८७।३, ९९१।१०, ९९३।११, ९९४।७

**योगियाज्ञवल्क्यः**—६१।१०, ६९।२, ७४।१३, ७८।५, ८०।१९, ८१।३, २३६।१, २७२।५, २७३।२१, २७५।६, २८१ ५,

वसिष्ठः (क्रमागतः)—
३७४।१३, ३७५।१४, ३८८।५, ३८९।३, ३९७।१४, ४१५।४, ४३०।१३, ४५९।७, ५३०।१६, ५४८।२०, ५५९।१, ५६२।७, ५९७।१४, ६४७।८, ६५२।१५, ६५२।१९, ६५६।१४, ६८२।३, ७१०।१५, ७८२।४, ७८५।१, ७८७।२२, ८०८।१७, ८१०।१६, ८११।४, ८३६।१७, ८३७।५, ८४३।१९, ८५१।१, ८८३।१२, ८८५।२, ९०८।१९, ९११।५, ९१५।१५, ९१६।१०, ९२१।२, ९३८।३, ९५९।१७, ९६७।५, ९६८।२, ९६९।१६

ज्योतिर्वसिष्ठः—५३०।१, ५३१।१७

लघुवसिष्ठः—८२९।५

वृद्धवसिष्ठः—५२९।११, ५३०।१३, ५३१।५, ५३१।१९, ५३५।११, ५३६।२१, ६१२।३, ८९९।३, ८९९।१७, ९००।१५

बृहद्वसिष्ठः—१७२।८, २६४।७, ४२०।१४, ४२८।५, ५१५।१६

योगीश्वरः—५२।१८, ६१।७, ६७।४, ८२।२, ६५७।३, ६६३।२१, ६६९।१५

योगियोगीश्वरः—२७५।२०

द्वैपायनः—६९।१३

बादरायणः—१८६।१९

काश्यपः—४५।६, ७२।१६, ७३।१०, १३१।२०, १५०।१२, २५५।१, ३९४।१८, ४६६।२०, ८९९।११

गार्ग्यः—८६।१२, १७०।१०, २०७।३, २०७।१५, २६७।१८, २६८।४, २६८।१३, ५२३।५, ५३१।१९, ५७६।१९, ६१६।१९

वृद्धगार्ग्यः—५२३।१२, ५२३।१३, ५२४।४

प्रचेताः—५२।१२, ३०८।८, ३५४।२, ३८६।१६, ३८८।२, ३८८।५, ४३५।११, ४५४।२२, ४८२।२, ४८८।१०, ५६४।४, ५६५।२०, ५७३।१३, ५७७।१, ५८०।४, ६१८।१०, ८०८।२, ८१७।६, ८६४।१७

वृद्धप्रचेताः—४३२।५, ८८३।४

वृहत्प्रचेताः—८९।१

मरीचिः—१८०।१, २०८।२१, २८८।११, २८८।८, ३८८।८, ४०१।११, ४०३।१४, ४२२।१६, ४३४।१६, ५०८।१, ५११।८, ५२७।३, ६००।११, ६१६।१३, ७२८।१, ८१५।१०

पौलस्त्यः—२०८।१२, २६२।८, ३३४।१२, ४१८।१८, ४७८।१७, ५४०।५, ८१४।१२, ८३८।१, ८५४।७

भृगुः—७१।१६, ५१७।१२, ५१८।११, ५४८।१०

नारदः—११८।५, १४३।१, १४५।१५, १४८।३, १५०।२१, १५४।१, २०८।१८, २१८।१, २२६।१८, ५०८।६, ६४५।३, ६४७।१, ६४७।५, ६६७।२, ६७५।१२, ६८४।२०, ६८८।१०, ८४६।८

विश्वामित्रः—४७५।१३, ७७२।३

कौशिकः—२३८।१६, २४१।७

देवलः—२१।१५, ४२।२, ४८।७, ७३।१३, ८६।१८, १०८।१४, १२५।१७, १५७।१८, १८८।१६, २१६।१, २४७।५, २५०।६, २७२।१३, ३१८।५, ३२६।१७, ३३४।१५, ३३५।६, ३३६।५,

**देवलः (क्रमागतः)—**

३४९।१७, ३७४।२०, ३७७।५, ३९६।१०, ४१६।३, ४१६।२०, ४१७।९, ४२७।१३, ४५४।३, ४६१।१६, ४६४।१६, ४६६।१, ५१५।१, ५२२।१३, ५६२।१३, ५६६।२, ५६६।१३, ५७७।२०, ७०६।१२, ७५९।२०, ७७७।१५, ७७८।१३, ८२५।१७, ९२४।२२, ९३६।९, ९५७।२१, ९६०।१४

**ऋष्यशृङ्गः**—८६।८, ३२६।६, ४०२।१४, ५११।१६, ६०९।११, ६१८।५, ८७०।१६, ८९५।९, ९५८।१६

**बौधायनः**—५१।४, ५१।१३, ५७।१०, ५८।१८, ७०।१४, ८५।२, ८७।४, १३७।१५, १४८।७, १४९।११, १७८।१३, २७५।१, २८८।१७, ३१५।६, ३२७।१८, ३२९।१२, ३५१।११, ३७४।४, ४०२।१७, ४२५।२, ४४७।४, ४५०।१२, ४५५।१५, ४५७।५, ४६०।१३, ४६४।७, ४६७।११, ४८१।५, ५६८।४, ५८९।९, ६१८।१८, ६२५।२, ६६९।११, ७५०।७, ७८२।१०, ८२१।१, ८२२।१, ९१६।७, ९९१।१६

**पैठीनसिः**—५४।१६, ५५।१०, ११८।६, ११९।८, १३९।११, १९४।१०, २३५।१०, २४८।८, २५६।९, ३१८।२५, ३२८।२०, ४१७।१९, ४२०।१०, ४२८।१३, ४४१।५, ५५७।१०, ५६१।९, ६१७।३, ६२३।५, ७८३।१७, ७९६।६, ८१७।४

**जाबालिः**—२४६।१०, २४७।२, २७२।२, २७२।१६, ४९६।१६, ५०२।२२, ६१९।३, ७३१।६, ७३२।१०, ७३३।७, ७३७।१२, ७४८।१९, ८४३।६

सुमन्तुः—१३५।१४, १७२।५, १७२।१६, ३४२।१, ४०३।३, ४८१।१०, ५२०।४, ५२९।१, ५४४।७, ६२२।७, ६२४।१४, ६३०।८, ७८०।१९, ७८५।९, ७९५।३, ७९६।३, ८४०।१२, ९७१।४, ९९३।१५

पारस्करः—१७।१४, ११४।१६, १६९।१९, १७५।६, २७५।१७, ३५०।२१, ३५१।२०, ३९९।१५, ४३७।८, ४७८।७

लौकाक्षिः—२३।१२, २४।२, ३१८।११, ३२०।७, ३५१।१३, ३५८।८, ३६०।३, ३६१।१२, ४९३।१, ४९४।१५, ६१६।२१

कौथुमिः—५४८।५

च्यवनः—७८६।७

छागलेयः—७८४।५

जातूकर्णः—२७५।१२, २७६।८, ४१९।३, ४४२।११, ५८४।१, ६००।३, ६१३।२०, ८१८।१०, ८३९।१७

पितामहः—४१।१, ५०५।९

प्रजापतिः—३५४।१७, ४३४।९, ४३९।१६, ६१९।२०, ९१२।६

धौम्यः—९४४।४

आश्वलायनः—४३१।११, ५८६ १४, ६००।१, ६३४।४

भरद्वाजः—४४ ५, ५३।१७, २१४।६, २४७।८, २४८।२, ५९७।२२, ९४०।७, ९४२।१९

गोभिलः—१९।१४, ५६।८, ८४।१६, २३६।१७, २८७।१, ३३१।२०, ३५१।९, ४८९।६, ४८९।१३, ५०६।९, ५०७.१८, ५०९।१२, ६१४।१५, ६१५।२२, ६१६।१९, ६३०।१४

## पुराणनामानि।

ब्रह्मपुराणम्—२५।५, ५७।१३, ७६।१६, ८०।३, ३२८।५, ३३०।१०, ३३३।१, ४१४।१, ४२२।७, ४३८।१०, ४८७।६, ५२१।१७, ५७०।१२, ५७०।१६, ५७६।१३, ५७७।८, ५८०।१३, ५६०।१३, ६०१।१५, ६१४।१७, ६२२।१, ६३४।१६, ६३६।५

पद्मपुराणम्—२६६।६

विष्णुपुराणम्—४३।४, ४४।२, ४५।६, ६७।१६, ११७।२२, १२१।२०, २०४।८, २११।२, २१२।१४, २४६।१३, २७६।५, २८४।६, ३२५।७, ३३३।४, ३४३।१७, ३४४।७, ३४६।७, ४२०।१, ४७८।१४, ५१५।१६, ५३८।१६

विष्णुधर्म्मोत्तरपुराणम्—३५३।१४, ४८४।१०, ५३८।२

वायुपुराणम्—२४।१६, ४८६।१६, ५५२।१६, ५५८।१०, ५७६।८, ५८१।८, ५८५।१३, ५६१।३, ५६६।१६, ६००।८, ६२५।१५

नारदीयपुराणम्—२६५।१, ५०७।२, ५३६।४

मार्कण्डेयपुराणम्—६१।२, ६७।६, ११६।११, १२२।११, १२५।८, २४८।११, २६४।१६, ३०८।५, ३२६।६, ३२६।२०, ४७३।६

भविष्यपुराणम्—३३।१६, ७३।२, २६२।१४, ३२४।३, ३२५।२, ३३२।१७, ३५५।१०, ३५८।२, ४११।१५, ४४०।१२,

तामुत्तरेण यमुनातटदेशनिष्ठा
काष्ठेत्यभूदनुपमा नगरी गरिष्ठा ।
यस्यामनल्पविभवोपचिता बभूवुः
काष्ठान्वया महितकीर्त्तियुषो महीशाः ॥ ५ ॥

तस्मिन्नभूद्विमलकाष्ठकुलाम्बुराशा-
वुद्यत्प्रभूतशुभकीर्त्तिघनप्रकाशः ।
लोकैः सदा हृदि धृतो गुणसन्निविष्टः
श्रीरत्नपालनृपतिर्भुवनैकरत्नम् ॥ ६ ॥

तस्यात्मजो भवहपाल इति प्रसिद्धः
सिद्धाङ्गनाजनसमाजसमिद्धकीर्त्तिः ।
दानेन यः सुकृतिनां क्षिपति स्म दैन्यं
सैन्यश्च वैश्यसदृशः प्रतिभूपतीनाम् ॥ ७ ॥

सुतोऽस्य जातः सुकृतोन्नतस्य
न तस्य कश्चित्सदृशो बभूव ।
यमस्खलत्सत्यमवेक्ष्य तातो
नाम्ना हरिश्चन्द्र इति व्यधत्त ॥ ८ ॥

सत्यान्वितो हरिरतो गिरिजेशयोगो
लक्ष्मीयुतो जगति वर्णचतुष्टयेन ।
वर्ण्यान्वयः स तु कलाविधया* प्रतीत-
स्तत्रावतेरमराः पुरुषाः पवित्राः ॥ ९ ॥

---

*कृषिव्यापारेण ।

तस्यात्मजोऽभूदमलप्रतापो-
ऽसाधारणो भूमिपतिर्वदान्यः।
अभूतपूर्व्वामवनीश्वराणा-
मजीजयद्योगगतिञ्च कीर्त्तिम् ॥ १० ॥

यस्मिन्नसाधारणधैर्य्यशौर्य्य-
गाम्भीर्य्यसौन्दर्य्यगुणैकधुर्य्ये।
गिरीन्द्रभीमानुजसिन्धुराज-
स्मराश्च साधारणतां भजन्ते ॥ ११ ॥

लक्ष्मीं लक्ष्मवतीं विधाय विबुधाहारस्य हारस्य च
ज्योतिर्गर्व्वमपास्य पार्व्वणशरच्चन्द्रस्य चन्द्रस्य च।
उन्मीलन्नवसौरसैन्धवलसड्डिण्डीरपिण्डोपमा
यस्यैता भुवि नो सृजन्त्यनुदिनं सम्पूर्त्तयः कीर्त्तयः॥१२

बन्धच्छिदां द्विरदकीर्त्ति*मिहान्वितार्थां
कृत्वा परत्र च तथैव विधातुमिच्छुः।
कीनाशपाशचय†बन्धविमोचनार्थं
तीर्थत्रयीकरविमुक्ति‡मचीकरद्यः ॥ १३ ॥

पुरोहितश्रीरामदेवकृतमिदं श्लोकत्रयोदशकम्।

---

* हस्तिनां विसरम्।

† यमपाशसमूहः।

‡ काश्यादितीर्थत्रयेषु दर्शनार्थमागतानां लोकानां करविमुक्तिः करविमोचनं-
रग्राहणमिति यावत्।

दक्षः ।

यद्दिवा विहितं शौचं तदर्द्धं निशि स्मृतम् ।

तदर्द्धमातुरे प्रोक्तमातुरस्यार्द्धमध्वनि ॥

आदिपुराणे ।

स्त्रीशूद्रयोरर्द्धमानं शौचं प्रोक्तं मनीषिभिः ।

यो विण्मूत्रोत्सर्जनायोपविष्टः सन् करोति तस्याप्यर्द्धशौचमाह

वृद्धपराशरः ।

उपविश्य तु विण्मूत्रं कर्त्तुं यस्तत्र* विन्दति ।

स कुर्य्यादर्द्धशौचन्तु स्वस्य शौचस्य सर्व्वदेति ॥

अत्र संख्याया विषमत्वेनाङ्गीकरणासम्भवात्तत्र साधा मृदर्द्ध-परिमाणा ग्राह्या ।

आर्त्तः कुर्य्याद्यथाशक्ति स्वस्थः कुर्य्याद्यथोचितम् ।

बालस्यानुपनीतस्य गन्धलेपक्षयावहम् ॥

वृद्धपराशरः ।

अरण्ये निर्जने रात्रौ चौरव्याघ्राकुले पथि ।

कृत्वा मूत्रपुरीषञ्च द्रव्यहस्तो न दूष्यति ॥

उदकादिकं हस्ते धारयित्वा न दूष्यतीत्यर्थः । पक्षे तु द्रव्यहस्तो न दूष्यतीत्यस्यान्यथार्थं वर्णयन्ति । एवंविधस्थले पक्वान्नादिद्रव्यं हस्ते गृहीत्वा मूत्रपुरीषकरणेऽपि तद्द्रव्यं शुद्धमेवेति । तद्द्रव्यं हस्ते गृहीत्वैवाचमने कृते शुद्धं भवतीत्यर्थः ।

भोजनकाले शुद्धकाले विशेषमाह

* वसतीति पाठान्तरम् ।

: कल्पनागौरवं न्यायस्तर्हि सपिण्डशब्दप्रवृत्तौ* पूर्व्वोक्त-
मित्तान्येव स्युः ।

अथ कल्पनालाघवं न्यायस्तत्र वयं ब्रूमः । पिण्डो देहः
ान एकः पिण्डो देहो यस्य स सपिण्डः । तस्य भाव
पिण्डं तच्च पुत्रादीनामेकशरीरावयवान्वयेन पत्न्यादीन
त्वभार्य्यादीनाञ्चैकशरीरारम्भकत्वेनैकशरीरावयवान्वितैः स
ार्य्यकर्तृत्वेन च भवति एवञ्च शब्दप्रवृत्तौ† निमित्तत्र
ाङ्गीकृतं स्यात् । अथैवं मन्यसे एकपिण्डदानक्रियान्व
मेकपिण्डदानक्रियान्वयान्वयित्वञ्चेति निमित्तद्वयमिति ग
ल्पनागौरवमिति । तर्हि अस्मत्पक्षेऽपि एकमेव निमित्त
ाति ततोऽपि लाघवम् । तच्चैकशरीरावयवान्वयित्वमेव
वयवान्वयश्च पित्रादिषु अवयवानां समवायकरणत्वेन ण
द्ध्वेकशरीरावयवान् प्रति साक्षात्परम्परावयवाऽि
ानेति निमित्तैक्यालाघवम् ।

कल्पनागौरवञ्च गर्हितमाचार्य्यैः कल्पनालाघवं यत्र ?
ोधयामहे तदेकतरत्र निपुणं सम्प्रधार्य्यतामिति ।
नर्मथ्य पङ्कजादिवद्योगरूढोऽयं शब्दः§ । शरीरावयव व

---

* सापिण्ड्यनिर्णये ।

† व्युत्पत्तिनिर्व्वाचने ।

‡ एककार्य्यकर्तृत्वैकशरीरारम्भकत्वैकावयवान्वितत्वरूपम् ।

§ निर्मथ्य विचार्य्य चयं शब्दः सापिण्ड्यशब्दः सम्प्रधार्य्यतामिति पूर्व्व
ान्वयः ।

वापीकूपतड़ागादि*क्रिया: प्रागुदितास्त्यजेत् ॥

अस्तादिलक्षणं ब्रह्मसिद्धान्ते ।

रविणा सन्निरन्येषां ग्रहाणामस्त उच्यते ।
अर्व्वागूर्द्धमवस्था स्याच्छीघ्राद्वार्द्धकशैशवे ॥ इति ।

बालवृद्धयोरवधिर्दामोदरीये ।

प्राग्बालो दिवसत्रयं दशदिनं पश्चात्सितो वृद्धताम्
पक्षे वासरपञ्चके च लभते पक्षे गुरु: सर्व्वत: ।
तत्पश्चाद्गुरुशुक्रयोर्विमलयो: कुर्य्याद्विवाहं सिते
कृष्णे वासरपञ्चकञ्च शिशवश्च स्याद्दशाह: पर: ॥ इति ।

वार्हस्पत्ये तु ।

प्राक् पश्चादुदित: शुक्र: पञ्च सप्तदिनं शिशु: ।
विपरीतस्तु वृद्धत्वं तद्वदेव गुरोरपीति ॥

अथ देशभेदेन आपदा च व्यवस्थामाह गार्ग्य: ।

शुक्रो गुरु: प्रागपरार्ककालो†
विन्ध्ये दशावन्तिषु सप्तरात्रम् ।
वङ्गेषु हूनेषु‡ च षट् च पञ्च
शेषे च देशे त्रिदिनं वदन्ति ॥ इति ।

---

* विवाहादीति पाठान्तरम् ।

†. शुक्रोगुरुश्च चेत् प्राक् पूर्व्वस्यां दिशि अपरस्मिन् पश्चिमस्यां दिशि अर्ककाल: अर्केण सूर्य्येण युक्त: सन् बालत्वादि प्राप्तस्तदा तन्निमित्तकाल: अकाल: ।

‡ हूनेषु म्लेच्छदेशविशेषेषु यथा – श्वपाकश्च तुरष्कश्च हूनोयवन इत्यपि ।

दैवविधानात्। प्रथमं नित्यश्राद्धं पश्चाद्वैश्वदेव इति केचित्।
अत्रापि पक्षे येषान्तु नित्यश्राद्धमेव पञ्चयज्ञान्तःपाति तेषां स्वशाखानुसारेण क्रमः केचन वैश्वदेवादनन्तरं कुर्व्वन्ति।

पाठक्रममनादृत्य श्राद्धविषये

मार्कण्डेयपुराणे।

कुर्य्यादहरहः श्राद्धमन्नाद्येनोदकेन वा।
पितॄनुद्दिश्य विप्रांस्तु भोजयेद्विप्रमेव च॥ इति।

अत्र विशेषमाह प्रचेताः।

नामन्त्रणं न होमश्च नावाहनविसर्ज्जने।
न पिण्डदानं न सुरान्नित्ये कुर्य्याद्द्विजोत्तमः॥
उपवेश्यासनं दत्त्वा सम्पूज्य कुसुमादिभिः।
निर्द्दिश्य भोजयित्वा तु किञ्चिद्दत्त्वा विसर्जयेत्॥

न सुरान् वैश्वदेवान् किञ्चिद्दत्त्वा इति दक्षिणार्थम्।

व्यासः।

नावाहनं स्वधाकारः पिण्डाग्नौकरणादिकम्।
ब्रह्मचर्य्यादि नियमो वैश्वदेवास्तथैव च॥

तथा।

तत्तु षट्पुरुषं ज्ञेयं दक्षिणापिण्डवर्ज्जितम्।

मत्स्यपुराणे।

यद्येकं भोजयेद्विप्रन्त्रीनुद्दिश्य पितॄंस्तथा। इति।

त्रीनिति मातामहादीनामपि प्रदर्शनार्थम्।

तत्र कात्यायनोऽनुकल्पमाह।

यथाह यमदग्निः ।

वैश्वदेवं तथा रात्रौ कुर्य्याद्बलिहृतिं तथा ।

महतः पञ्चयज्ञांस्तु दिवैवेत्याह धर्म्मविदिति ॥

येषान्तु शाखिनां ब्रह्मयज्ञव्यतिरिक्तान्यमहायज्ञानां वैश्वदेव-बलिहृतौ चान्तर्भावः तेषां दिवैव वैश्वदेवाख्यं कर्म्म न रात्रौ यदि स्वशाखायां कालद्वयेऽपि विधानं नास्ति अथास्ति तदा द्विरपि भवति निर्णयः द्विविधं हि वैश्वदेवादिकं कर्म्म एकं मन्वादिस्मृत्युक्तसाधारणमपरं स्वस्वगृह्योक्तसाधारणं स्वशाखा-ऽविरुद्धं सर्व्वैरपि कार्य्यं कर्म्मणः सर्व्वशाखाधिकरणन्यायेनै-कत्वात् । अत्राशक्तश्चेत् स्वस्वगृह्योक्तमेव तावता शास्त्रार्थस्य निष्पन्नत्वात् । एतच्च संसृष्टिनां मध्ये ज्येष्ठ एव कुर्य्यात् । तद-शक्त्यादिना तदनुज्ञयेतरस्यापि कर्त्तृत्वमस्ति ।

अनग्निकस्य विशेषमाह

वशिष्ठः ।

अनग्निकस्तु यो विप्रः सोऽन्नं व्याहृतिभिः स्वयम् ।

हुत्वा शाकलमन्त्रैस्तु शिष्टाद्भूतबलिं हरेत् ॥

अनग्निकः श्रौतस्मार्त्ताग्निरहितः । यदा वैश्वदेवादर्व्वाक् भिक्षु-रागच्छति तदा वैश्वदेवार्थमन्नमुद्धृत्य वैश्वदेवार्थं भिक्षां दत्त्वा विसर्ज्जयेत् । भिक्षुका अपि तेनैव दर्शिताः ।

ब्रह्मचारी यतिश्चैव विद्यार्थी गुरुपोषकः ।

अध्वगः क्षीणवृत्तिश्च षड़ेते भिक्षुकाः स्मृताः ॥

इति वैश्वदेवविधिः ।

तथा ।

पृथक्पाकेन नैत्यं स्यादिति ।

यदि ब्राह्मणविसर्ज्जनान्ते वैश्वदेवस्तदा तच्छेषेण, इतरथा पृथगिति निर्णयः ।

इति वैश्वदेवपाकनिर्णयः ।

## अथ वैश्वदेवकालनिर्णयः ।

तत्र साग्निः श्राद्धात्पूर्व्वमेव वैश्वदेवं कुर्व्वीत तदाह लौकाक्षिः ।

पञ्चान्त्यकर्म्म निर्व्वर्त्त्य वैश्वदेवञ्च साग्निकः ।

पितृयज्ञं ततः कुर्य्यात्ततोऽन्वाहार्य्यकम्बुधः ॥

इति पञ्चान्त्यमन्वाधानमन्वाहार्य्यकं दर्शश्राद्धं ननु वैश्वदेवस्य पञ्चान्तपिण्डपितृयज्ञयोर्मध्यविधिबलादेव साग्निककर्त्तृत्वावगतेः पुनः साग्निकशब्दोपादानमपार्थकमिति चेन्नैवम् । अन्वाधानपिण्डपितृयज्ञकर्त्तुरौपासनाग्निनिवृत्त्यर्थत्वेन सार्थकत्वात् ।

देवलोऽपि वैश्वदेवानन्तरमेव पिण्डपितृयज्ञादिकर्त्तव्यतामाह ।

प्रकृते वैश्वदेवे तु स्थालीपाकः प्रकीर्त्तितः ।

अन्यत्र पिण्डयज्ञात्तु सोऽपराह्णे विधीयते ॥ इति ।

स्थालीपाकशब्देन स्थालीपाकसाध्यकर्म्माण्युच्यन्ते । एतानि

त्रिरात्रन्तु भवेच्छुद्धिरिति ॥

व्याघ्रपादोऽपि ।

तुल्यं वयसि सर्व्वेषामिति ।

यत्त्वङ्गिरसाभिहितम् ।

विप्रे न्यूने त्रिभिर्वर्षैर्मृते शुद्धिस्तु नैशिकी ।
द्व्यहेन क्षत्त्रिये शुद्धिस्त्रिभिर्वैश्यमृते तथा ॥

तथान्यदपि तेनैव ।

निवृत्तचूडके विप्रे त्रिरात्राच्छुद्धिरिष्यते ।
निवृत्ते क्षत्त्रिये षड्भिर्वैश्ये नवभिरुच्यते ॥
शूद्रे त्रिवर्षन्यूने तु मृते शुद्धिस्तु पञ्चभिः ।
अत ऊर्द्ध्वं मृते शूद्रे द्वादशाहो विधीयते ॥
षड्वर्षान्तमतीतो यः शूद्रः संम्रियते यदि ।
मासिकन्तु भवेच्छौचमित्यङ्गिरसभाषितम् ॥ इति ।

षड्वर्षान्तमतीतो य इत्यनेन च हारीतवचनं विरुध्यते ।

वचनन्तु ।

आमौञ्जिबन्धनाद्विप्रः क्षत्त्रियश्च धनुर्ग्रहात् ।
आप्रतोदग्रहाद्वैश्यः शूद्रो वस्त्रद्वयग्रहात् ॥ इति ।

मौञ्जिबन्धनाद्यनन्तरं मृतः पूर्णाशौचनिमित्तं भवतीत्यर्थः ।
शूद्रो वस्त्रद्वयग्रहणयोग्यो द्वादशादिवर्षदेशीय* एव न षड्वर्ष-

---

* ईषदसमाप्तौ देशीयप्रत्ययविधानात् आदिपदाच्च द्वादशवर्षमारभ्य षोडशवर्षादौ-षद्यूनकालिक इत्यर्थः ।

मुभयतो* यजेतेत्यादीनामपि वाक्यानामयमेव विषयः इयञ्चोक्त-
विषये प्रतिपदिष्टिसमाप्तिराहिताग्नेरेव नानाहिताग्नेः तस्य
तु स्थालीपाक एव नेष्टिः स च सूर्य्योदयानन्तरमेव वर्त्तनीयः†
तथा स्वल्पकालसाध्यस्य प्रयोगप्रेप्सुभावस्य च शास्त्रे विधाना-
सम्भवे विरामासम्भवः । विराममन्तरेण च प्रतिपदि समा-
पयितुं न शक्तः न ह्यशक्यं विदधाति शास्त्रं तस्मात्प्रतिपद्यप्रवि-
ष्टायां यदि चेष्टिः समाप्यत इत्येतदनाहिताग्निविषयम् ।

पौर्णमास्यान्तु विशेषमाह कात्यायनः ।

सन्धिश्चेत्सङ्गवादूर्द्ध‡मर्व्वागावर्त्तनाद्भवेत् ।
सा पौर्णमासी विज्ञेया सद्यः कालविधौ तिथिः ॥ इति ।

तत्रैवान्वाधानं तत्रैव याग इत्यर्थः ।

अमावास्यायां§ विशेषमाह शातातपः ।

द्वितीया त्रिमुहूर्त्ता चेत्प्रतिपच्चापराह्णिकी ।
अन्वाधानं चतुर्द्दश्यां परतः सोमदर्शनात् ॥ इति ।

एतद्व्यावर्त्तने ततः पूर्व्वं वा सन्धौ च चतुर्द्दश्यामन्वाधान-
विषयम्¶ ।

---

* पर्व्वप्रतिपदोः सन्धिं सन्धौ इत्यर्थः । † आरम्भणीय इति पाठान्तरम् । ‡ प्रातःकाले मुहूर्त्तांस्त्रीन् सङ्गवस्तावदेव न इति वचनानुसारेण द्वादशदण्डात् परमित्यर्थः । § अन्वाधानम् । ¶ यत्र प्रातश्चतुर्द्दशी परतोऽमावास्या तत्परदिनेऽमावस्या आवर्त्तनकालेतत्पूर्व्वकाले वा प्रतिपत् तत्परदिने सन्ध्याह्नपर्य्यन्तं प्रतिपत् द्वितीया च अपराह्णमुहूर्त्तत्रयव्यापिनी भवेत् कल्ये चतुर्द्दश्यां चतुर्द्दशीयुक्तामावस्यायां सिनीवालीत्वेन प्रातश्चन्द्रदर्शनात् परतो अन्वाधानम् ।

आगच्छन्तु महाभागाः विश्वेदेवा महाबलाः* ॥

ये यत्र विहिताः श्राद्धे सावधाना भवन्तु ते ।

इष्टिश्राद्धमाधानादौ क्रियमाणं नान्दीमुखे इष्टिश्राद्धे नैमित्तिके सपिण्डीकरणे कामनयानुष्ठेयगयामहालयादिश्राद्धं काम्यम् । पार्व्वणं दर्शश्राद्धं सकलश्राद्धप्रकृतिभूतम् । यदा महालयाश्राद्धं केवलनित्यबुद्ध्या करोति तदा पुरूरवाद्रवावेव । यदा तु केवलकाम्यबुद्ध्या तदा धुरिलोचनावेव । यदा तु उभयबुद्ध्या तदापि धुरिलोचनावेव । यतः काम्यं नित्यस्य बाधकम् । यदा तु गोदोहनेन पशुकाम इतिवद्गुणफलाधिकारः स्यात्तदोपक्रमे कामनाभावान्नित्यकर्म्माश्रयणेन गुणफलविधेश्च पुरूरवार्द्रवावेवेति विवेकः ।

अनेनैवाभिप्रायेण आदिपुराणे ।

विश्वेदेवौ क्रतुदक्षः सर्व्वास्विष्टिषु कीर्त्तितौ ।

नित्यं नान्दीमुखश्राद्धे वसुसत्यौ च पैतृके ।

नवान्नलम्भनादिश्ये कालकामौ सदैव हि ॥

अपि कन्यागते सूर्य्ये श्राद्धे च धुरिलोचनौ ।

पुरूरवार्द्रवौ चैव विश्वेदेवाश्च पार्व्वणे ॥ इति ।

पैतृके नवान्नलम्भने नवान्नलाभरूपनिमित्तेन पितृभक्त्या पूजनात्तेन श्राद्धे क्रियमाणे अथवा नवान्नलम्भनं सपिण्डीकरणं पितृभिः सार्द्धं तत्रैवान्नस्य प्रथमत एव लाभान्नवान्नलम्भनम् ।

* वरप्रदा इति पाठान्तरम् ।

स्वर्गमार्गावलम्बस्य न स्यादस्मात्किमप्यलम्* ॥

स्वर्गमार्गावलम्बस्य स्वर्गेच्छोः ।

इदं व्रतं दुराधर्षं महापातकनाशनम् ।
स्वर्गद्वारमिदं श्रेष्ठं महादेवप्रचोदितम् ॥
वाङ्मनोभ्याञ्च कायेन यानि पापानि देहिनः ।
आचामस्तानि निर्हन्ति नवश्राद्धञ्च सूतकम् ॥
तैलस्य दारुणं किञ्चित्केशपच्चिहतञ्च† यत् ।
पिण्याकस्तानि निर्हन्ति अस्थि भित्त्वा च यत्स्थितम् ॥

तैलस्य भक्ष्यमाणस्य तथाच निषिद्धदिने अभ्यङ्गादिषु योज्यमानस्य दारुणमलक्ष्मीकरं यत्पापं केशपच्चिहतं‡ केशपक्ष्युपहतं अस्थि भित्त्वा स्थितं यत् पूर्व्वकृतं पापं दीर्घकालत्वाद्दृढं संस्थितं यदस्थि भित्त्वा स्थितमित्युच्यते ।

आहारेषु च ये दोषाः सर्पिर्दोषाश्च ये क्वचित् ।
तक्रेण तानि पूतानि श्वभिर्यच्चावलोकितम् ॥
कनकञ्च तिला गावो भूमिराच्छादनं स्त्रियः ।
सर्व्वं पुनाति धर्म्मात्मा तथैवोदकशक्तुभिः ॥

कनकादिप्रतिग्रहजनितं पापं पुनातीत्यर्थः ।

वाचा कृतङ्कर्म्मकृतं§ मनसा दुर्विचिन्तितम् ।
सर्व्वमेतत्त्रिरात्रेण पुनातीति न संशयः ॥

---

* निर्व्वेदोपहतस्य च इति क्वचित् पुस्तके पाठः । † केशपच्चहतं इति क्वचित्पाठः । ‡ केशपत्तहतं केशपचोपहतमिति क्वचित्पाठः । § कर्म्मणा च इति पाठान्तरम् ।

कृच्छ्रफलं मलापहारिण्यां योजनसंख्यया कृच्छ्रसंख्या तथा निवृत्त्यामपि गोदावर्य्यां यात्रायोजनवृद्धौ पादकृच्छ्रवृद्धिः। सिंहे गुरौ सर्व्वत्र जाह्नवीसमाः कन्यास्थे गुरौ कृष्णवेण्यां* सर्व्वत्र जाह्नव्यर्द्धं तुङ्गभद्रायां तुलास्थे रवौ कर्कटस्थे वा गङ्गार्द्धं कृष्णवेण्यां मलापहारिणीसङ्गमे त्रिंशद्योजनागतस्य त्रिंशत्कृच्छ्रसमं भागीरथीसङ्गमे† द्विगुणं तुङ्गभद्रासङ्गमे त्रिगुणं निवृत्तिसङ्गमे चतुर्गुणं ब्रह्मेश्वरे पञ्चगुणम्। मल्लिकार्ज्जुनसमीपे पातालगङ्गायां षड्गुणं कावेर्य्यां महानद्यां दशयोजनागतस्य पञ्चदशकृच्छ्रफलम्। द्वादशयोजनागतस्य द्वादशकृच्छ्रफलं ताम्रपर्णी कीर्त्तिमाला पयस्विनीषु सह्याद्रिपादोद्भूता नद्यो योजनविच्छिन्नप्रवाहरूपाश्च दैर्घ्यानुसारेण योजनागतस्यैकद्वित्रिकृच्छ्रफलप्रदाः। विन्ध्यश्रीशैलोद्भवा द्विगुणाः हिमाचलोद्भूतास्त्रिगुणाः। स्मृतिपुराणादिषु यथाकथञ्चिदनुक्तकुल्या योजनागतस्यैकद्वित्रिकृच्छ्रफलप्रदाः। अल्पनद्यः कृच्छ्रफलप्रदाः। नद्यः द्विकृच्छ्रफलप्रदाः। महानद्यः कृच्छ्रत्रयफलप्रदाः। एकयोजनगादिषड्योजनगान्ताः स्रवन्त्यः कुल्याः ततो द्वादशयोजनागान्ताः अल्पनद्यश्चतुर्विंशतियोजनगान्ताः नद्यश्चतुर्विंशतियोजनाधिकगा महानद्यः समुद्रगाश्च यत्र महानदीति व्यपदेशस्ताश्च महानद्य उपवाससहितं महानदीस्नानं योजना-

---

* कृष्णवेणायामिति क्वचित् पाठः। क्वचिच्च वेलायामिति पाठः। † भीमरथीसङ्गमे क्वचित् पाठः।

षिभ्राट् बृहत् पिबतु सोम्यम् मध्वित्यस्यां गीतं साममहा-
द्दिवा कीर्त्यम्* आज्यदोहाख्यानि सामानि† ज्येष्ठसाम्ना-

---

* विभ्राड्बृहत्पिबतु सोम्यं मध्वायुर्दधद्यज्ञपतावविह्रुतम् ।
वातजूतो योऽअभिरक्षतित्मना प्रजाः पिपर्त्ति बहुधा विराजति ॥

† अग्निर्वैश्वानरोऽनुष्टुप् सोमः, गर्गात्रिरात्रस्य
प्रथमेऽह्नि आर्भवे विनियोगः ।

१ २ १ र ३र ३ ५ १ र ३ १३ ५
औहम् प्रसुन्वानार । यअन्धार२३४सा. । मार्त्तोनवार । षटतद्वार२३४चाः ।

१ र ३२ ३ ५ १र ३२३ ५ १रर
अपश्वानार२म् । अराधार२३४साम् । हतामखार२म् । नवगार२३४वाः ॥ आभामिरार ।

३र२३ ५ १३ ३२ ३ ५ १ र ३२ ३ ५
ले अव्यार२३४ता । भुजनपूर२त् । चउणार२३४थीः । सरोज्जारोर । नयांधार२३४णाम् ।

१र ३२ ३ ५ १र र ३२ ३ ५ १ ३२ ३
वरीनयोर । निमासार२३४दाम् ॥ सवीरोदार२चसाधार२३४नाः । वियस्तस्तार । भरोदा-

५ १ ३र२३ ५ १रर ३२ ३ ५
२३४सायि । हविः पवार३यि । नेअव्यार२३४ता । वेधानयोर । निमासार२३४दाम् ।

२ १२
ए ३ । ऋतम् ॥ ४

ईनिधनमाज्यदोहम् ।

अग्निर्वैश्वानरस्त्रिष्टुप् सोमः, द्वितीयेऽहनि मध्यन्दिनान्त्यम् ।

२१ र २१ २ ३५ २११ २ १ २३४र५
अयं९ सोमाः । इन्द्र तु।भ्यं९ सुन्वायि । तुभ्यम्पवा । ता३यितुवम् । असत्पाह्नो ।

२१ २३र २३ ५ २१ २ १ २र३४र५
तुभ्यं९ इयाम । चकृषे । त्वं वव्रषायि । इन्दुम्मदा । या३युजि । याय सोमाम् ।

१ १र २१ २र३४र५ २१ २ १र २ ३४र५ २र१र
सहूं९रथो । नभुरि । षाडोयजो । महः पुरू । नो३सात । यायि वसूनो । आदौं विश्वा ।

२१ २र३४र५ २१र. २१र २र२४५ २१ र २१र
नहुषि । यानि आता । सुवर्षा ताः । वनऊ । ध्यानवन्ता ॥ गृष्णोप्राङ्गों । नमाकृ३-

यथाहोशना ।

षण्मासन्त्यजते यो वै पराकं स समाचरेत् ।
ऊर्द्ध पयोव्रतं कुर्य्यान्मासमेकं समाहितः ॥
वर्षपर्य्यन्तमेवाहुर्मुनयः संशितव्रताः ।

संवत्सरादूर्द्धन्तु स्कन्दपुराणे ।

ऊर्द्ध संवत्सरादग्निं यस्त्यजेत्पयसो व्रतम् ।
हैमासिकं ततः कुर्य्यात्त्रैमासिकमथापि वा ॥

कालाल्पत्वमहत्त्वापेक्षया विकल्पः । प्रमादान्मासमग्निपरित्यागेऽपि

स्कन्दपुराणे ।

हुताशनं हि यो विप्रः प्रमादात्त्यजति प्रभो ।
उपवासं तथा कुर्य्यात्प्राजापत्यमथापि वा ॥

प्राणायामशतं त्रिरात्रपरित्यागे ।

कूर्म्मपुराणे ।

षष्टिरात्रं त्यजेदग्निं प्रमादात् शृणु मे विभो ।
उपवासं तथा कुर्य्यात्प्राजापत्यमथापि वा ॥

तथेत्यनेन तत्र त्रिरात्रं परामृष्यते, मासद्वयपरित्यागे त्रिरात्रं अत ऊर्द्ध संवत्सरपर्य्यन्तं मासप्राजापत्यं अत ऊर्द्ध कालबहुत्वे प्रायश्चित्तबहुत्वम् ।

तथाच भारद्वाजगृह्यं ।

प्राणायामशतमात्रिरात्रादुपवासः स्याद्दाविंशतिरात्रादत ऊर्द्ध मासः षष्टिरात्रात्तिस्रोरात्रीरुपवसेत् अत

